**বেদান্তসম্মতং বায়ুপঞ্চকং নিরূপয়ত(5Marks)**

শ্রীসদানন্দযোগীন্দ্রসরস্বতীপ্রণীতঃ **'বেদান্তসারঃ'** একঃ প্রকরণগ্রন্থঃ।অস্মিন্ গ্রন্থে বায়ুপঞ্চকং
আলোচিতম্।**"বায়বঃ-প্রাণ-অপান-ব্যান-উদান-সমানঃ"।**প্রাণাদয়ঃপঞ্চবায়বঃ।তে চ প্রাণাপান-ব্যানোদানসমানসংজ্ঞকাঃসন্তি।

অধুনা ময়া বেদান্তসারসম্মতং বায়ুপঞ্চকং লিখ্যতে।

**ক) প্রাণঃ-"প্রাণ নাম প্রাগ্ গমনবান্ নাসাগ্রস্থানবর্তী।।"**প্রাণো নাম বায়ুঃ ঊর্ধ্বগমনশীলঃ নাসাগ্রস্থায়ী চ ভবতি।যদ্যপি হৃদয়স্থানীয়ঃ প্রাণঃ  তথাপি নাসাগ্রে প্রত্যক্ষরূপেণ উপলভ্যতে,ইতি নাসাগ্রস্থায়ী।

**খ)অপানঃ-"অপান নাম-অবাগ্ গমনবান্ পায়ু-আদিস্থানবর্তী।।"**অপানো নাম অধোগমনশীলঃ পায়্বাদি-স্থানপর্যন্তং ভ্রমতি ইতি **অপানঃ।**

**গ)ব্যানঃ-"ব্যানঃ নাম বিষ্বগ্ গমনবান্ অখিলশরীরবর্তী।।"**ব্যানো নাম বিষ্বগ্ গমনশীলঃ সর্বনাড়ীভ্রমনশীলঃ বা অখিলশরীরস্থায়ী বায়ুঃ।

**ঘ)উদানঃ-"উদানঃ নাম কন্ঠস্থানীয়ঃ ঊর্ধ্বগমনবান্ উৎক্রমণবায়ুঃ।।"**উদানো নাম ঊর্ধ্বদেশম্ উৎক্রমণশীলঃ কন্ঠস্থায়ী বায়ুঃ।

**ঙ)সমানঃ-"সমানঃ নাম শরীর মধ্যগত-অশিত-পীত-অন্নাদি সমীকরণকরঃ।।"**
সমানো নাম শরীরমধ্যগতান্নরসাদিনেতা বায়ুঃ।অশিতাদেঃ  সম নয়নাৎ সমানঃ।'সমীকরণং তু পরিপাক-করণং রস-রুধির-শুক্র-পুরীষাদিকরণম্ ইতি তাবৎ।'

সাংখ্যমতানুযায়িনঃ ক্রিয়াভেদেন অন্যে পঞ্চবায়বঃ স্বীকুর্বন্তি।যথোক্তম্-

**"উদ্গারে নাগ আখ্যাতঃ,কূর্ম উন্মীলনে স্মৃতঃ।কৃকরঃক্ষুৎকরো জ্ঞেয়ো, দেবদত্তো বিজৃম্ভণো।।**

**ন জহাতি মৃতং চাপি, সর্বব্যাপী ধনঞ্জয়ঃ।।"**অর্থাৎ
নাগ-কূর্ম-কৃকর-দেবদত্ত-ধনঞ্জয়াখ্যাঃ পঞ্চবায়বঃ ভবন্তি।তত্র নাগঃ উৎগিরণকরঃকূর্ম উন্মীলনকরঃ,কৃকরঃ ক্ষুধাকরঃ,দেবদত্তঃ জৃম্ভণকরঃ, ধনঞ্জয়ঃ পোষণকরঃ।।
এতেষাং নাগাদীনাং প্রাণাদিষ্বেব অন্তর্ভাবং স্বীকুর্বন্তি বেদান্তিনঃ।অতঃ বায়বস্তু প্রাণাদিকাঃ পঞ্চৈব।ইমাঃ পঞ্চবায়বঃ রজঃ প্রধানেভ্যঃ অপঞ্চীকৃতপঞ্চভূতেভ্যঃ মিলিতেভ্যঃঅংশেভ্যঃ সমুদ্ভবন্তি।কর্মেন্দ্রিয়সহিতং তৎ প্রাণাদিপঞ্চকং প্রাণময়কোশঃ ইত্যুচ্যতে।এতচ্চ ক্রিয়াত্মকমিত্যস্য রজোগুণাংশকার্যত্বম্।